Roll No..........................
Signature of Invigilator .........

Paper Code

BV-303

# पतंजलि विश्वविद्यालय

## University of Patanjali

### Examination December -2022

### बी. ए. व्याकरण, तृतीयसत्रम्

### व्याकरणम्, तृतीयपत्रम्

### संस्कृतसाहित्यम्

समयः - होरात्रयम् | पूर्णाङ्काः ७०

---

निर्देशः अस्य प्रश्नपत्रस्य सप्तत्यङ्काः निर्धारिताः सन्ति, अङ्कनिर्देशः प्रतिखण्डं द्रष्टव्यः, सर्वे प्रश्नाः समाधेयाः।

( खण्ड -क )

पृष्टेषु पञ्चसु त्रयः प्रश्नाः समाधेयाः (15 x3 =45)

1. नाटकाङ्कयोः सलक्षणं व्याख्या कुर्वन्तु।
2. (क) शिवराजविजयमधिकृत्य कवेः परिचयं लिखन्तु।
   (ख) शिवराजविजयस्य प्रथमनिश्वासस्य सारांशं लिखन्तु।
3. (क) श्लोकयोः व्याख्या कार्या।

   भये प्रीतौ च शोके च निद्रया नाभिभूयते।
   तस्मान्निद्राभियोगेषु सेवितव्यमिदं त्रयम्।।
   प्रनष्टो यस्यसन्मार्गो नष्ट तस्यामृतं पदम्।
   प्रनष्टममृतं यस्य स दुःखान्न विमुच्यते।।

   (ख) सौन्दरानन्दस्य कयोश्चिद् द्वयोः श्लोकयोः सप्रसङ्गं व्याख्यानं कुर्वन्तु।

4. प्रस्तावनाभेदान् लक्षणोदाहरणसहितं लिखन्तु।

5. गद्यव्याख्यानं कुर्वत्तु।

   (क) "अहो! चिररात्राय सुप्तोऽहम्, स्वप्नजालपरतन्त्रेणैव महान् पुण्यमयः समयोऽतिवाहितः, सन्ध्योपासन- समयोऽयमस्मद्गुरुचरणानाम्, तत् सपदि अवचिनोमि कुसुमानि' इति चिन्तयन् कदलीदलमेकमाकुञ्च्य, तृणशकलैः सन्धाय, पुटक विधाय, पुष्पावचयं कर्तुमारेभे।

   (ख) शिवराजविजयमधिकृत्य कन्यायाः चरित्र-चित्रणं कुर्वन्तु।

## (खण्ड - ख)

पृष्टेषु अष्टसु पञ्च प्रश्नाः समाधेयाः (5 x5 =25)

1. विष्कम्भकस्य प्रवेशकस्य च सलक्षणं व्याख्या कुर्वन्तु।

2. कथानुसारेण स्वशब्दैर्गुरुब्रह्मचारिणोः चरित्र-चित्रणं कुर्वन्तु।

3. कारकविभक्तिसमासपुरस्सरं श्लोकस्य अर्थं ज्ञापयन्तु।

   प्रदीप्ते जीवलोके हि मृत्युव्याधिजराग्निभिः।

   कः शयीत निरुद्वेगः प्रदीप्त इव वेश्मनि।।

4. अभिनयस्य स्वरूपं तद्भेदांश्च निरूपयन्तु।

5. सौन्दरानन्दस्याधीतानां श्लोकानां सारं लिखन्तु।

6. प्रस्तावनास्वरूपं लिखन्तु।

7. यवनैः भारतभूमेः का दशा कृता? वर्णयन्तु।

8. दृश्यश्रव्यकाव्ययोर्भेदं वर्णयन्तु।

--------------x--------------